Introduction

# महाराजा-सयाजीराव-विश्वविद्यालये
# "वाचस्पति" उपाध्यर्थे
# प्रस्तावितस्य
# श्री स्वामिनारायणदर्शनाभिमततत्त्वविवेचनमिति
# शीर्षकस्य शोधप्रबन्धस्य
# विषयानुक्रमः

**प्रेरणायाः उत्सः**

बाल्यकालस्य महति प्रत्यूषेऽहं श्रीस्वामिनारायणसम्प्रदाये दीक्षितोऽभूवमपाठिषञ्चैतद् दर्शनविषयान्नैकान् ग्रन्थान्। अतो बाल्यकालादेव संप्रदायस्यास्य तत्त्वविवेचनविषयिणी समुत्कण्ठा ममान्तःकरणे विजृम्भे। अहमुपर्युक्तस्य विश्वविद्यालयस्य संस्कृतविभागे आचार्यपरीक्षां विशेषयोग्यतया सहोत्तीर्णोऽभूवम्। तत्पूर्वं श्री सम्पूर्णानंदसंस्कृतमहाविद्यालयतः व्याकरणशास्त्रमेवाध्येष्म शास्त्रीपर्यन्तम्। किन्त्वाचार्यपरीक्षा मया रामानुजवेदान्तमेवाश्रित्य समुत्तीर्णा। अध्ययनसमकालमेव ममेच्छा श्रीस्वामिनारायणदर्शने स्वीकृतानां तत्त्वानां स्वरूपरूपगुणभेदादि-विवेचनविषयिणी तीव्रा समभवत्। आचार्यपरीक्षाऽनन्तरं गुरुजनैः साकं काले-काले विचारचर्चापि प्राचलत्।

विदुषां गुरुजनानामुपसेवनान्मयेदमपि ज्ञातं यत् संसारदवदग्धानां जीवानां सकलकलुषसंहरणसमर्थैः भवभयाभितप्तजनभागधेयभावितावतरणैः, समेषां भगवदवताराणामवतारि स्वरूपैः कलितमायामनुषतनुभिर्भगवद्भिः श्री स्वामिनारायणैः श्री सहजानंदाऽपराभिधानैः प्रवर्तितमिदं दर्शनम्। भगवता श्रीस्वामिनारायणेन सम्प्रदायेऽस्मिन् दीक्षितानां समेषां जनानां कृते आचारव्यवहारप्रदर्शिका आकारेणातिलघ्वी सकलशास्त्रसारभूता "शिक्षापत्री" प्रणीता वर्तते। अस्या एव शिक्षापत्र्या आलोके सम्प्रदायेऽस्मिन् दीक्षितानां समेषां महतां सतां गृहस्थानाञ्च व्यवहाराः समीक्ष्यन्ते। विशदविवेचने कृते स्पष्टीभवति यद् यद्यपि सन्ति आत्मोज्जीवनस्य बहूनि शास्त्रोक्तानि साधनानि, तथापि भक्तेरेव प्राधान्यं विराजतेतरां तेषु साधनेषु।

नास्ति तिरोहितमिदं यत् सम्प्रदायस्यास्य सकलाः मान्यता वैदिक्यः सन्ति। (श्रीमद्भागवत्पुराणस्यैकादशस्कन्धे भगवता श्रीकृष्णेन मुमुक्षवे

स्वदासेष्वग्रगण्यायोद्धावाय यानि तत्त्वानि कथितानि, तानि सम्प्रदायेऽत्र अविकलतया स्वीक्रियन्ते ।

रहस्यग्रन्थास्त्वस्य सम्प्रदायस्य "वचनामृतम्" श्रीहरिवाक्यसुधासिन्धुः" इत्यादिकाः वर्तन्ते । दर्शनमिदं श्री रामानुजमतानुकरणमेवेति सत्यादपेतम् । तत्त्वत्रयेष्वेतेषामीश्वरब्रह्मणां तत्त्वानामन्तर्भावकरणे सति जीवेश्वरब्रह्मपरब्रह्मणां स्वरूपस्वभावादिकानां ज्ञाने भ्रान्तयो भवन्तीति । तन्निराकर्तुमेव श्रीस्वामिनारायणसम्प्रदाये पञ्चतत्त्वानि स्वीक्रियन्ते ।

तानि च सन्ति

१. जीवः २. ईश्वरः ३.माया-( प्रकृतिः ) ४. ब्रह्म ५. परब्रह्म चेति। अत्र क्रमाल्लक्ष्माणि प्रतिपाद्यन्ते ।

१. जीवः

स्थूलादिदेहत्रितयमानखादाशिखं च यः।
व्याप्येन्द्रियान्तःकरणैः करोति विविधाःक्रियाः॥

अजो नित्यः शाश्वतश्च निरंशश्च प्रकाशकः ।
सोऽच्छेद्यादिगुणो ज्ञेयो जीवात्मा वर्णिसत्तमः ॥

२. ईश्वरः

देहत्रये विराडादौ व्याप्योत्पत्तिस्थितिक्षयान् ।
करोति जगतां यस्तु सर्वज्ञो ज्ञेय ईश्वरः ॥

३. माया-

जन्मक्षेत्रं च जीवानामनादिश्चिज्जडात्मिका ।
तमोमयी हरेः शक्तिः कार्यकारणरूपिणी ॥

गुणत्रयात्मिका चाजा या चोक्ताऽज्ञानसंज्ञिका ।
सा मायेति त्वया ज्ञेया यां तरन्त्याश्रिता हरेः ॥

४. ब्रह्म

सत्यं ज्ञानमनन्तं च पूर्णं चाखण्डमक्षरम् ।
धाम यद्वासुदेवस्य मूर्तं चामूर्तमुच्यते ॥

शुद्धं नित्यं चाविकारि मायादीनां प्रकाशकम्।
तद्ब्रह्मेति विजानीहि सर्वाधारतया मतम् ॥

**५. परब्रह्म**

नारायणो वासुदेवः स्वतंत्रः स्वप्रकाशकः ।
आनन्ददिव्यमूर्तिश्च विष्णुः कृष्णोऽच्युतोऽव्यय : ॥

सर्वज्ञः सत्यसकंल्पः सर्वकर्मफलप्रदः।
अन्तर्यामि सर्वशक्तिसेवितः परमेश्वरः॥

सर्वत्रैवान्वितः शक्त्या व्यतिरिक्तः स्वतः स्थितः ।
नियन्ता कालमायादेः सर्वकारणकारणम् ॥

परमात्मेति यत्प्राहुस्तत्परंब्रह्म कथ्यते ।
उपासनीयं सर्वेषामेतदेव मुमुक्षताम् ॥

**तत्र जीवाः देवमनुष्यतिर्यक्स्थावराख्याः सन्ति । ब्रह्माण्डैश्वर्यादिप्राप्तिमन्तश्च ईश्वरा इत्यभिधीयन्ते । मुक्तानामेव ब्रह्मेतिसंज्ञा स्वीकृता सम्प्रदायेऽस्मिन् । जगतोऽभिन्ननिमित्तोपादानकारणं परंब्रह्म । अहंकारममतादयो यस्याः रूपं सैव माया । एषां लक्षणानि चोद्याऽनुमानप्रयोगाः क्रियन्ते । तद्यथा-**

१. **जीवात्मा नित्यः, आजीवनस्मृतिमत्त्वात्, पूर्वजन्मीयसंस्कारोत्थाद्यक्रियानुकूलस्मरणवत्त्वात् ।**
२. अत एव प्रवाहगत**ब्रह्माण्डानां प्रवाहस्यानादित्वेन तद्रक्षकसंहारक-ईश्वराणामप्यनादित्वम्।**
३. **ततो ब्रह्माण्डादिकारणात्मकमायाया अप्यनादित्वम् ।**
४. **तस्याः सृष्टिप्रयोजकब्रह्मणोऽप्यनादित्वम् ।**
५. **तच्छरीरिणः परमात्मनोऽपि सृष्टिप्रवाहादिनिरीक्षकतया अनादित्वं सिद्ध्यति ।**

**श्री स्वामिनारायण दर्शनाभिमतानां पञ्चतत्त्वानां श्रौतस्मार्तवचनप्रामाण्येन मिथोभेद वर्णनमत्र क्रियते । तथाहि-**

## १. जीवात्मपरमात्मनोर्भेदः

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्वनश्नन्नन्योऽभिचाकशीति" ॥**
**"ऋतं पिबन्तौ सुकृतस्य लोके गृहां प्रविष्टौ परमे परार्धे । छायातपौ ब्रह्मविदो वदन्ति"।**

"एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च" ।
"यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ।"
"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।"
ईत्थं मुण्डकोपनिषत्कठोपनिषदोः वचांसि **जीवात्मपरमात्मनोर्भेदं ज्ञापयन्ति** ।

## २. ईश्वरपरमात्म**नोर्भेदः**

तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम् ।
पतिं पतीनां परमं परस्ताद् विदाम देवं भुवनेशमीड्यम् ॥ इति
कठोपनिष**च्छ्रु**तिवचनं ईश्वरपरमात्म**नोर्भेदं स्पष्टीकरोति**

## ३. मायापरमात्म**नोर्भेदः**

"मायां तु प्रकृतिं विद्यान् मायिनं तु महेश्वरम् ।
भोक्ता भोग्यं प्रेरितारं च मत्वा..."
इति श्वेताश्वतरोपनिषद् वचनप्रामाण्यात् मायापरमात्मनोर्भेदः ज्ञातुं सुलभः।

## ४. ब्रह्मपरमात्म**नोर्भेदः**

"दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः ।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः॥
"ब्रह्मविदाप्नोति परम्
"परमेवाक्ष प्रतिपद्यते स यो ह वै तदच्छायमशरीरमलोहितं
शुभ्रमक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वो भवति ।"
"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥"
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥"
इत्यादि श्रौतस्मार्तवचांसि ब्रह्मपरमात्म**नोर्भेदराहित्य**मपाकरोति ।
परमात्मानश्च सर्वशासकत्वं सर्वनियन्तृत्वं सर्वतो भिन्नत्वं च
"न तत्समश्चाभ्यधिकश्च दृश्यते "
"एकमेवाद्वितीयं ब्रह्म"

"नित्यो नित्यानां चेतनश्चेतनानामेकोबहूनाम्"

" नित्यं ज्ञानमनन्तं ब्रह्म"

इत्यादिना सिद्धप्रथम् ।

एवं रीत्या श्रुतिस्मृतितर्कानुगृहितैर्वचनैः जीवः इश्वरः माया ब्रह्म परब्रह्मणां निरूपणं कृतम् । भगवान श्रीस्वामिनारायणोऽपि पुरुषोत्तमः, पुरुषः, ईश्वरो, जीवो, माया चेति पञ्चभेदा अनादय"इति वदति । तत्वपञ्चकमिमांसा दर्शनजगति अश्रुतपूर्वैवाभाति, अस्या तत्वपञ्चकमिमांसायाः वर्णनं भगवतः श्रीस्वामिनारायणस्यैव वचसामालोके श्रीकृष्णवल्लभाचार्येण ससूत्रं कृतमस्ति। तद् यथा

"पञ्चतत्त्वानाञ्च नित्यत्वम् " सूत्रम् - ३२ ॥

सूत्रेण कृतं वर्तते । तद्यथा -नित्यत्वमिति । अनादिभावस्य ध्वंसाऽभावान्नित्यत्वम्, उत्पत्तिध्वंसरहितत्वम्, उत्पत्तिः स्वरूपस्याऽऽद्यक्षणसम्बन्धः स च नास्ति पञ्चानाम्, अत एवाऽन्तिमक्षणवियोगो ध्वंसोऽपि नास्ति, स्वरूपपरिणामोऽपि न परब्रह्मणोऽखण्डमूर्तित्व मध्यस्य ६४ तमे प्रोक्तम् । अन्त्यस्य ७- "भगवत्स्वरूपे कालसामर्थ्य न प्रवर्तते । लोहस्य १८-" भगवत्स्वरूपं सदा नित्यं द्विभुजं वर्तते भगवद्रूपमनादि वर्तते"। लोहस्य १४- "जीवमायापुरुषोत्तमा नित्याः, रामानुजाचार्येण क्षराऽक्षरपरस्य पुरुषोत्तमस्य भगवतो निरूपणं यथा कृतं तस्मिन्नेव पुरुषोत्तमभगवति भवत्यस्माकमुपासना" । **लोहस्य ४-"तस्य भगवतः स्वरूपं सर्वकाले सत्यमिति भगवन्मूर्तिः सदैकसमरूपा द्विभुजैकरूपैव विराजमाना विद्यते भगवतः स्वरूपमेकमेवाऽस्ति"। कारियाण्याः ७-"स भगवान्नुत्पत्तिस्थितिप्रलयादिसर्वविधापनकाले एकरूप एव विराजतेऽन्यपदार्थवद्विकारं न विन्दते, सदा दिव्यरूपो विराजतेऽखण्डितो विराजते"।**

**सारंगस्य १२- "ब्रह्मणि परब्रह्माऽखण्डं विराजते "। सारंगस्य ११-"मम चैतन्ये भगवान् सदा विराजते"। प्रथमस्य ६६-"भगवाँस्तु नित्यो दिव्यमूर्तिरस्ति, अनन्तकल्याणगुणैर्युक्**तोऽस्ति, तत्तेजोऽपि ब्रह्मसत्तारूपो नित्यः पुरूषोत्तमभगवतो मूर्तेः प्रकाशोऽस्ति"। प्र० ६५-"अपि तु य आकाशः सर्वेषामाधारः स तु यद्वत् प्रकृतिपुरुषौ नित्यौ तद्वन्नित्योऽस्ति तस्योत्पत्तिलयौ न स्तः"। प्र०६४-"जीवो निर्विकारो वर्तते"। प्र० ६३-"अक्षरस्य संकोचविकासात्मकाऽवस्थे न स्तः, तत्तु सर्वदैकरूपमेव तिष्ठति, अस्मिंन्नत्राक्षरधामनि स्व( हरि )साधर्म्यपन्ना अनन्तकोटिमुक्ता भगवत्सेवायां वर्तन्ते "। प्र० ५६- "ब्रह्माण्डानां प्रलयेऽयं भगवानेको विराजते स भगवान् सृष्टिप्रारम्भे पुनरेवाऽनन्तकोटिब्रह्माण्डानि

समुद्धावयति"।प्र० ४६ "एतादृशो यः सर्वाधारश्चिदाकाशोऽतिप्रकाशोऽनादिरस्ति तस्योत्पत्तिविनाशौ न स्तः, चिदाकाशस्य लीनताऽपि नास्ति "। प्र०३२ - "नारदसनकादिकसमा अनादिमुक्ताः" । प्र० २५-"तव स्वरूपस्तु आत्माऽस्ति, देहो नास्ति, त्वं त्वछेद्याऽभेद्याऽऽत्मस्वरूपोऽसि" । प्र०२४-"आत्मैकरसचैतन्यो भासते भगवत्स्वरूपं मायागुणपरं सर्वविकाररहितं वर्तते"। प्र० १८- "अहन्त्वनादिमुक्तोऽस्मि"। प्र०१३-"जीवस्त्वच्छेद्योऽच्युतोऽस्ति"। प्र०१२- "अखण्डोऽनादिरनन्तः सत्यः स्वयंज्योतिः सर्वज्ञो दिव्यविग्रहः क्षेत्रज्ञ आकारमात्रकारणं पुरुषः, प्रकृतिस्तु त्रिगुणात्मा जडचिदात्मिका नित्या निर्विशेषा तत्त्वानां क्षेत्रं भगवच्छक्तिर्गुणसाम्यं च, निर्विशेषा या माया तस्याः क्षोभकः कालः"। प्र०१३-" आत्यन्तिकप्रलये महामायाऽक्षरब्रह्मप्रकाशे लीना (सूक्ष्मावस्था) भवति, यथा दिवसे रात्रिर्लीना भवति तद्वत्, ब्रह्माण्डप्रलये सर्वे जीवा मायायां वसन्ति भगवद्भक्तास्तु धामनि वसन्ति, भगवद्धाम तु- नित्यमप्राकृतं सच्चिदानंदमनन्तमखण्डं तेजोमयं विद्यते"। प्र०८-"अनन्तकालीनानि पापानि जीवेषु वल्गितानि, ।कारियाण्या : १-"जीवः सूक्ष्मातिसूक्ष्मः"। सारंग० १३-" आत्माऽच्छेद्योऽभेद्योऽजरोऽमरो ज्ञानरूपः सुखरूपः सत्तारूपश्च" । सारंग० ५- "अच्छेद्याऽभेद्याऽविनाशी जीवरूपम्"-इत्येवं जीवेश्वरमायाब्रह्मपरब्रह्मणां पञ्चतत्त्वानां नित्यत्वम् ।

**अथ जीवकोटयो ब्रह्माण्डेषु, ईश्वरकोटयो ब्रह्माण्डेभ्यो बहिर्महामायोत्पादितसात्त्विकसृष्टिषु,** मुक्तकोटयोऽक्षरधाम्नि, मूलाक्षरं ब्रह्म मूर्ते श्रीहरिसेवायां, मूलाऽक्षरमूर्ते धामरूपं प्रकाशात्मकं स्वरूपम्, स प्रकाशः श्रीहरेर्मूर्तेरेवेति वस्तुस्थितिः

अथाऽन्तिमे १०वचनामृते-जीवमायेश्वरब्रह्मपरमेश्वरा अनादयः, माया पृथ्वीरूपाः, जीवाः बीजरूपाः, ईश्वरा मेघरूपाः, भगवदिच्छया पुरुषोत्तमात्मकेश्वरस्य मायासम्बन्धेनाऽनादिकालिका जीवाः स्थूलावस्थामाप्नुवन्तीति प्रोक्तम् । अत्र जीवा उद्भवन्तीति यदुक्तं, तेन मायास्थाः सर्वेऽपि जीवा इति भ्रमो न कार्यः, जीवन्ति स्थूलायन्ते मायया ये ते जीवा इति व्युत्पत्यया जीवात्मान ईश्वराश्चेत्युभये ग्राह्याः, नन्वत्र जीवोत्तरं माया तत ईश्वरो लिखित इति, क्रमेण तु मायायां ये ते जीवा इति व्युत्पत्त्या मायाया उत्तरं ईश्वराः इति ज्ञायते, -इति चेन्न, पूर्वापरीभावेन समन्वयकरणात् विराडादीश्वरा अत्रोक्तास्तेन तत्रापि विराडादिप्रधानपुरुषपर्यन्ता ईश्वरा ग्राह्याः। सारंगपुरस्याऽष्टमे जीवेश्वरमायाब्रह्मपरब्रह्मणां भेदान्निरूपयति पृथक्पृथक् सा परावाणीतीश्वरा मायातः प्रथममेवोक्ताः, एवं कारियाण्याः प्रथमे विराट् मायायां

लीयते, जीवेश्वरौ नामरूपसहितौ सन्तौ सुषुप्तौ मायायां लीयेते-इत्युक्तम् । निमित्तप्रलये ईश्वरोपाधयो लीना भवन्तीत्युक्तं श्रीनगरस्य द्वितीयेऽपि, मायोत्तरो यः पुरुषः स तु धाममुक्तो यः हरिप्रेरणया मायया संयुक्तः, तदुक्तं प्रथमस्य द्वादशे -"श्रीकृष्णभगवान् परब्रह्म परमात्माऽक्षरपुरुषरूपेणाऽक्षरमुक्तरूपेण मायायां गर्भमाधत्त, प्रकृतेर्नियन्ता पुरुषो मुक्तः, प्रथमस्य त्रयस्त्रिंशे- "पुरुषप्रकृतिरूपेण सः प्रकृतिसंयुक्तो मुक्त एवोक्तः, प्रथमस्यैकचत्वारिंशे-" अक्षरातीतपुरुषोत्तम भगवान् सृष्टिसमयेऽक्षराभिमुखी दृष्टिं करोति तदा तदक्षरधाममध्यात्पुरुषः प्रकटीभवति, ततः स पुरुषोत्तमोऽक्षरं प्रविश्य पुरुषरूपेण प्रकृतिं प्रेरयति, ततः प्रकृतिपुरुषात् प्रधानपुरुषाः सम्भूताः" इत्यत्रापि अक्षरमुक्त एव पुरुषः । प्रथमस्य षट्चत्वारिंशे -"यदा पुरुषः प्रकृतिसम्मुखं पश्यतीत्यत्रापि अक्षरमुक्त एव पुरुष उक्तः, प्रकृतिकार्यलये सति स्वस्वरूपेण वर्ततेइत्युक्तम् ।

मध्यस्यैकत्रिंशे-"वासुदेवो भगवान् महापुरुषरूपेण महामायायां वीर्यमाधत्ते इत्यत्र महापुरुषोऽयं प्रकृतिपुरुषो मुक्तो बोध्यः, स चाऽक्षरस्य मुक्तो ब्रह्ममुक्तो बोध्यः । अथ स पुरुषस्तु निरन्नो मुक्तो ब्रह्ममायाकारणमस्तीत्युक्तो मुक्त सः। ईश्वरेषु पुरुषेषु च भेदोऽस्ति, अक्षरात्मकपुरुषा ब्रह्मरूपा मुक्ता असंख्याता विद्यन्ते॥ एवं रीत्या पुरुषोत्तमः पुरुषः ईश्वरो जीवो माया चेति पञ्चभेदा अनादय"इत्यत्र पुरुषो ब्रह्मधामनि लाक्षणिकः प्रोक्तः ।

**प्रकारेणानेनास्मिन् सम्प्रदाये स्वीकृतानां समेषां तत्त्वानां भेदानां चोपनिषदितिहासपुराणादिसम्मतं स्वरूपादिनिरूपणादिकमस्मिन् शोधप्रबन्धे मया संस्कृत-हिन्दी-गुर्जर ( गुजराती ) -भाषानिबद्धानामनेकानां ग्रन्थानां पर्यालोचनं कृत्त्वा कृतम् ।**

## शोधहेतु :

**ब्रह्मसूत्रप्रधानप्रस्थानत्रयीमधिकृत्य काले काल उदीयमानेषु दर्शनेष्वन्यतमं श्रीस्वामिनारायणं दर्शनम् । दर्शनजगति नाधिकं महत्त्वं प्राप्तमद्यावधिदर्शनेनानेन, गुर्जरदेशीयं रामानुजदर्शनस्यापरनामधेयदर्शनमिति लोकविश्रुतिः सत्यादपेता एव । दर्शनवियति विद्यमानदेदीप्यमानस्य ध्रुवतारकस्यास्यावलोकनं सूक्ष्म-सूक्ष्मतर-सूक्ष्मतमदृष्ट्या करणीयमेवासीत् ।**

**प्रायः विहगावलोकनेन प्रथितवैष्णवेष्वन्यतमोऽयं श्रीस्वामिनारायणः संप्रदाय इत्याभासते। सूक्ष्मेक्षिकयावलोकनाज्ज्ञायते यदिदं न केवलं संप्रदायोऽपि तु वैष्णवदर्शनमिति । सूक्ष्मतरविवेकेनायं वैष्णवेष्वपि रामानुजदर्शनम्, ततोऽपि सूक्ष्मतमावलोकनेन रामानुजानुसारत्वेऽपि विशिष्टमेव श्रीस्वामिनारायणीयं "श्रीस्वामिनारायणदर्शनम्" इति निश्चीयते ।**

**दर्शनवियति वितता "रामानुजाभिन्नदर्शनश्रुतिः" अपाकृता भवेत्**

भवेच्च श्रीस्वामिनारायणदर्शनपरिचयः समेषां सुलभस्तदर्थमहं शोधप्रबन्धे प्रस्तुते प्रवृत्तः, तत्र साफल्यनिर्णयस्तु कालेन भविष्यति ।

भगवता श्रीस्वामिनारायणेन "वचनामृतम्", "शिक्षापत्री" ग्रन्थयोः, श्रीशतानन्दस्वामिना "श्रीहरिवाक्यसुधासिन्धुः"," श्री सत्संगिजीवनम्" ग्रन्थयोश्च दर्शनस्यास्य विशदविवेचनं कृतमाहितं चास्ति । कुर्वन्ति स्म भाष्यं गीतोपनिषदोः श्रीगोपालानंदः स्वामी । लिलेख ब्रह्मसूत्रेषु भाष्यं श्रीमुक्तानंदः स्वामी । श्रीकृष्णवल्लभाचार्यः श्रीस्वामिनारायणवेदान्तसारः" श्रीस्वामिनारायणदर्शनम्"आभ्यां ग्रंथाभ्यां दार्शनिकं तत्त्वं व्याचख्यौ ।

सप्तप्रकरणानुगुम्फिते प्रस्तुतशोधप्रबन्धे; समासेन भारतीयदर्शनपरंपरावर्णनपुरःसरं श्रीस्वामिनारायणदर्शनोद्गातुः, तस्य दार्शनिकविदुषां; ग्रन्थांनांचोद्देश्यत्त्वेन परिचयः प्रथमाध्यायस्य वर्ण्यविषयः। तत्रैवास्य दर्शनस्योद्देश्यत्त्वेन तत्त्वत्रयाणां पञ्चभेदानामुल्लेखः ।

द्वितीयाध्याये आत्ममीमांसा वरीवर्तते । आत्मनः देहेन्द्रिय मनःप्राणादिव्यतिरिक्तत्त्वं संसाध्य श्रुतिस्मृत्यनुकूलं आत्मस्वरूपं स्पष्टीक्रियतेऽत्र। आत्मनः ज्ञातृत्वकर्तृत्त्वादि निरूपणं कृत्त्वा बन्धनमोक्षमीमांसाऽपि कृता। जीवानां मुक्तानां च भेदनिरूपणं द्वितीयाध्याये निरूपितं वर्तते ।

तृतीयाध्याये – ईश्वरशब्दाभिलपनीयस्य तत्त्वस्य परब्रह्मव्यतिरिक्तत्त्वेन प्रतिपादनं कृत्वा तद्भेदादिकं स्पष्टीकृतं वर्तते ।

चतुर्थेऽध्याये मायायाः प्रकृतेर्वर्णनं विद्यते। तत्त्वपञ्चके तृतीयतत्त्वरूपेणास्याः वर्णनं कुर्वन्ति प्रस्तुतदर्शनदक्षाः । अत्र मायायाः नाम्नां विवेचनपुरःसरमिन्द्रियादीनां च समासेन लक्षणादिकं लक्ष्यते ।

पञ्चमेऽध्याये तत्वपञ्चकमध्ये चतुर्थभेदस्य ब्रह्मणः वर्णनं विशेषेण ध्यातव्यम् । शोधप्रबन्धेऽस्मिन् सर्वाधिकवैशिष्ट्ययुतं प्रकरणमिदमिति मे मनीषा । ब्रह्मणः स्वरूपनिरूपकधर्मवर्णनेन साकं ब्रह्मपरब्रह्मभेदसमर्थनं, आचार्यवचोभिः शास्त्रेषु प्रतिपादितब्रह्मणोऽसंदिग्धस्वरूपस्या त्रासंदिग्धरूपेणासंशोधनं सर्वङ्कषं नापि तु सर्वोत्कृष्टमिति न सन्देहावसरः ।

षष्ठाध्याये जीवेश्वरमायाब्रह्मव्यतिरिक्तस्य परब्रह्मणः वर्णनं वर्तते । परब्रह्माधिकृत्य कृतं विशदर्थयुतं वर्णनं भगवतः श्रीस्वामिनारायणस्य न कस्मादपि न्यूनम् । भगवतः श्रीस्वामिनारायणस्योपास्यत्व मप्यानुसंगिकतयोल्लेखितम् ।

परस्य ब्रह्मणः दिव्यविग्रह धाम - अवतारेत्यादीनां समासेन विवेचनं कृत्त्वा सम्प्रदायप्रथितवैमत्यशोधनमत्र कृतं वर्तते ।

सप्तमे चान्तिम उपसंहाराध्याये गवेषणाग्रन्थस्यास्य प्रतिपाद्य तत्फलवर्णनेन साकं सामाजिकमवदानं भविष्यञ्चोद्घाटितम् ।